अपि च शाक्तानन्दतरङ्गिणीधृततन्त्रे ।
"भुक्त्वा पीत्वा चरेत् पूजां जपं देव्याः समाहितः ।
साधके क्षोभमापन्ने मम क्षोभं प्रजायते ।
तस्माद्भुक्त्वा च पीत्वा च शक्तुभ्यो यजनं चरेत् ॥"

क्षोभकः, पुं, (क्षोभ + संज्ञायां कन् ।) कामाख्यास्थपर्व्वतविशेषः । यथा,—
"दुर्ज्जराख्यस्य पूर्व्वस्यां पुरं नाम वरासनम् ।
तद्दक्षिणे महाशैलः क्षोभको नाम नामतः ॥
तस्मिन् गिरौ शिलापृष्ठे वक्रे देवी व्यवस्थिता ।
पञ्चपुष्करिणी नाम्ना पञ्चयोनिस्वरूपिणी ॥
एकत्र पञ्चभिर्दुर्गा योनिभिः पञ्चवक्त्रकम् ।
स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिजा ॥"
इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः ॥ * ॥ (क्षुभ् + कर्त्तरि + ण्वुल् ।) क्षोभजनके त्रि ॥

क्षोभणं, त्रि, (क्षुभ् + णिच् + ल्युः ।) क्षोभजनकम् । सञ्चलनकारकम् । यथा,—
"आहताङ्गैः ससस्तैस्तं देवप्रहरणैस्तदा ।
अक्षोभ्याणां समुद्राणां क्षोभणं क्षिप्रकारिणम् ॥"
इति रामायणे । ३ । ३६ । १० ॥
"क्षोभणं क्षोभकर्त्तारम् ।" इति तट्टीका ॥ (क्ली भावे ल्युट् । क्षोभः ॥)

क्षोभणः, पुं, (क्षुभ + णिच् + ल्युः ।) वटुकभैरवः । यथा, विश्वसारोद्धारतन्त्रे तस्य स्तोत्रम् ।
"कङ्कालधारी मुण्डी च व्यालयज्ञोपवीतवान् ।
जृम्भणो मोहनः स्तम्भी मारणः क्षोभणस्तथा ॥"

क्षोभितः, त्रि, (क्षुभ् + णिच् + कर्म्मणि क्तः ।) क्षोभयुक्तः । सञ्चालितः । यथा,—
"पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥"
इति मार्कण्डेये देवीमाहात्म्ये । ८२ । ३७ ॥

क्षोमं, क्ली, (क्षुम + मन् । पृषोदरात् वृद्धिर्वा ।) दुकूलम् । इत्यमरः । २ । २ । १२ । क्षौमं इति च पाठः ॥

क्षोमः, पुं क्ली, (क्षुम + मन् ।) अट्टः । इत्यमरटीकायां भरतः ॥ क्षौमोऽपि पाठः ॥

क्षोमकः, पुं, (क्षोम + संज्ञायां कन् ।) गन्धद्रावकः । इति जटाधरः ॥

क्षोणिः, क्षोणी, } स्त्री, (क्षु + बाहुलकात् निः णत्वं वृद्धिः वा ङीप् च ।) पृथिवी । इत्यमरः । २ । १ । २ ॥ अस्या व्युत्पत्तिर्यथा,—
"इन्या च यागाधाराच क्षोणी क्षोणालये च या ।
महालये लयं याति क्षितिस्तेन प्रकीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः ॥ (यथा, भागवते । ३ । १४ । ३ ।
"तस्य चोद्धरतः क्षौणीं स्वदंष्ट्राग्रेण लीलया ॥")

क्षोणीप्राचीरः, पुं, (क्षोण्याः प्राचीर इव ।) समुद्रः । इति जटाधरः ॥

क्षोणीभुक् [ज्,] पुं, (क्षौणीं पृथ्वीं भुनक्तीति । भुज् + क्विप् ।) राजा । यथा,—
"कृत्वा शस्त्रविभीषिकां कतिपयग्रामेषु दीनाः प्रजा मथ्नन्तो विटजल्पितैरुपहताः क्षौणीभुजस्ते किल ।
विद्वांसोऽपि वयं किल त्रिजगतां सर्गस्थितिव्यापदामीशस्तत्परिचर्य्यया न गणितो येरेष नारायणः ॥"
इति शान्तिशतके । १ । ११ ॥

क्षौणीमयः, पुं, (क्षौणी + मयट् ।) मत्स्यः । पृथिव्याश्रयः । यथा,—
"मत्स्यो युगान्तसमये मनुनोपलब्धः
क्षौणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्मे
आदाय तत्र विजहार ह वेदमार्गान् ॥"
इति श्रीभागवते । २ । ७ । १२ ॥
"मत्स्यावतारमाह । मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः । क्षौणीमयः पृथ्वीमयः पृथिवीप्रधानस्तदाश्रय इत्यर्थः । अत एव निखिलजीवनिकायानामाश्रयः । मे मुखाद्विस्रंसितान् गलितान् वेदस्य मार्गान् वेदानादाय तत्र युगान्तसलिले विजहार । ह हर्षे ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ क्षोणीमयोऽपि पाठः ॥

क्षौद्रं, क्ली, (क्षुद्राभिः पिङ्गलवर्णमक्षिकाभिः सरघाभिर्निर्म्मितम् । क्षुद्र + "क्षुद्राभ्रमरवटरपादपादञ् ।" ४ । ३ । ११९ । इति अञ् ।) मधु । इत्यमरः । २ । ९ । १०७ ॥ जलम् । इति मेदिनी ॥ पिङ्गलवर्णक्षुद्रमक्षिकाकृतकपिलवर्णमधु । अस्य गुणाः । अतिशीतलत्वम् । लघुत्वम् । क्लेदनाशित्वम् । घृतयुक्तक्षौद्रस्य विषतुल्यत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"माक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥"
इति भावप्रकाशः ॥

क्षौद्रः, पुं, (क्षुद्र + अण् ।) चम्पकवृक्षः । इति शब्दचन्द्रिका ॥ वर्णसङ्करविशेषः । स तु सजातीयात् मागध्यां जातः । यथा,—
"चतुरो मागधी सूते क्रूरान् मायोपजीविनः ।
मांसं स्वादुकरं क्षौद्रं सौगन्ध्यमिति विश्रुतम् ॥"
इति महाभारते । १३ । ४८ । २२ ॥
"एते मागध्यामायोगवादिभ्यश्चतुर्भ्यः क्रमाज्जायन्ते । इत्युपसंहरति चतुर इति । एते चत्वारो वागुरादिना जीवन्तीति मायोपजीविनः । अन्येऽपि चत्वारो मागध्यां विश्रुताः सजातीयादुत्पद्यन्ते । तेषां नामानि मांसमित्यादि । मांसं मांसविक्रेतारम् । स्वादुकरं मांसस्यैव संस्कारकम् । क्षौद्रं सूदं शूद्रमिति पाठत्रयेऽपि शाकाद्यन्नपाककरम् । सौगन्ध्यम् उक्तलक्षणं सैरन्ध्रम् । एकस्यैव मागधस्य एतद्वृत्तिचतुष्टयमुक्तमिति ज्ञेयम् ।" इति तट्टीकायां नीलकण्ठः ॥ * ॥ क्षुद्रता । इति पाणिनिव्याकरणम् ॥

क्षौद्रक्यं, त्रि, (क्षुद्रकः आयुधजीविसंघः । "आयुधजीविसंघाञ्ञ्यटीति ।" ५ । ३ । ११४ । इति ञ्यट् ।) क्षुद्रम् । इति सिद्धान्तकौमुदी ॥

क्षौद्रजं, क्ली, (क्षौद्रात् जायते इति । जन + डः ।) शिक्थकम् । इति राजनिर्घण्टः ॥ मधुजातमात्रे त्रि ॥

क्षौद्रधातुः, पुं, (क्षौद्रजातो धातुः क्षौद्रं धातुरिव वा ।) माक्षिकम् । इति राजनिर्घण्टः ॥

क्षौद्रप्रियः, पुं, (क्षौद्राणां सरघाणां प्रियः क्षौद्रवत् मधुवत् प्रियो वा ।) जलमधूकवृक्षः । इति राजनिर्घण्टः ॥ मधुप्रिये त्रि ॥

क्षौद्रमेहः, पुं, (क्षौद्रसंज्ञको मेहः ।) प्रमेहरोगविशेषः । मधुमेह इति वैद्यकम् ।) तल्लक्षणं यथा,—
"कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ।
कषायं कषायवर्णम् ।" इति भावप्रकाशः ॥ अस्य चिकित्सा प्रमेहशब्दे द्रष्टव्या ॥

क्षौद्रेयं, क्ली, (क्षौद्रे भवं इति । ढञ् ।) शिक्थकम् । इति राजनिर्घण्टः ॥ क्षौद्रसम्बन्धिनि त्रि ॥

क्षौमं, त्रि, (क्षु + "अर्त्तिस्तुसुहुसृधृक्षिक्षुभेति ।" उणां । १ । १३९ । इति मन् । ततः प्रज्ञादित्वात् अण् । वृद्धिः ।) क्षुमाया विकारः । स्त्रियां क्षौमी कन्था इत्यादि । इत्यमरटीकायां भरतः ॥

क्षौमं, पुं, क्ली, (क्षु + मन् । ततोऽण् वृद्धिश्च ।) अट्टालकः । तत्पर्य्यायः । अट्टः २ । इत्यमरः । २ । २ । १२ ॥
"हे हर्म्म्यादिरहे । प्राकाराग्रस्थितरणगृहे इति कौटिल्यः । अट्टेति ख्याते गृहविशेषे इति कोक्कटः । प्राकारमस्तकस्योपरिशालायामिति केचित् । हर्म्म्यादिवातकुटिकायामिति केचित् । मस्तकोपरि हर्म्म्यपृष्ठे इति केचित् । प्राकारधारणार्थोऽभ्यन्तरे क्षौमाख्योऽट्टः । इति भट्टः । अट्टतेऽसौ अट्टः । अट्ट ङ विक्रमे वधे अल् । क्षुवन्ति शब्दायन्तेऽत्र क्षौमं । टु क्षु ल क्षुते नाम्नि इति मः गुणः स्वार्थे णः क्षौमञ्च । पट्टदुकूलयोः क्षोमं गुणवत् । वस्त्रभेदे क्षौमं वृद्धिमदिति बहवः । क्षौममट्टे दुकूले स्यादतसीवसनेऽपि चेति विश्वप्रकाशे अतसीवनेन सह पाठादट्टेऽपि क्षौममन्त्यस्वरवच । तत्र हि परेषां वृद्धिविधानात् ।" इति पुरवर्गे भरतः ॥ * ॥ अतसीवस्त्रम् । इति हेमचन्द्रः ॥ (यथाह याज्ञवल्क्यः । १ । १८७ ।
"स गौरसर्षपैः क्षौमं पुनः पाकान्महीमयम् ।
कारुहस्तः शुचिः पण्यं भैक्षं योषिन्मुखन्तथा ॥")
"क्षुमायाः विकारः क्षौमं वृद्धादि वाच्यलिङ्गश्च स्त्रियां क्षौमी कन्थेत्यादि ।" इति नृवर्गे भरतः ॥ * ॥ पट्टवस्त्रम् । तत्पर्य्यायः । दुकूलम् २ । इत्यमरः । २ । ६ । ११३ । "हे पट्टवस्त्रे । सौत्रवस्त्रादधिकं क्षौति क्षौमं टु क्षु शब्दे नाम्नीति मः गुणः । यत् पुनरतसीविकारवाचि प्रकृत्यन्तरं तद्वृद्धिमत् दुकूलार्थात् क्षोमात् स्वार्थे प्रज्ञादित्वादणि क्षौमञ्चेति केचित् । दुनोति उपतापयति अधिकग्रीष्मजननादिति नाम्नीति कूलकि दुकूलम् ।" इति च नृवर्गे भरतः ॥ * ॥ शणजवस्त्रम् । यथा, शब्दरत्नावल्याम् ।